लोपामुद्रामंत्रविधि

नं· १३६

नं. ~~१५८~~ २५१

श्रीगुरुपादुकाभ्यो नमः
श्रीगणेशाय नमः ॥

अथ लोपामुद्रामंत्रविधानम् ॥ हादिवि
द्यास्मृता देवी लोपामुद्राप्रकाशिता, महापंचदशी
रूपा स्मरणाद्भोगमोक्षदा ॥ हसकलह्रीं
कहलह्रीं ह्सौं सकलह्रीं ॥ अस्य श्रीलोपामुद्रामंत्रस्य
श्रीहयग्रीव ऋषिः । [illegible] छंदः । श्रीलोपामुद्रा देवता ।
प्रथमं बीजं तृतीयं शक्तिः द्वितीयं कीलकं [illegible] विनियोगः ॥
[illegible] न्यासः ॥ श्रीहयग्रीव ऋषये न
मः शिरसि [illegible] हृदि [illegible] करांगन्या
सं ॥ प्रथमं मूर्ध्नि द्वितीयं हृदि तृतीयं
नाभौ [illegible] ध्यायेत् ॥ अमृता
[illegible] द्वीपे [illegible] कल्पकाशो
क पुन्नाग पाटलेरुपशोभितम्, नवमालती
बिल्वदेवदारु [illegible] मंदारपारिजाताद्यैः क
[illegible] कारस्य मानतुं
गेषु च [illegible] तं [illegible] सादि रूपशो
भितम्, [illegible] कुसुमामोदिदिक्सु
खम्, तस्य मध्ये परंज्योतिस्स्वरूपो महा
पर्वतः, तस्य मध्ये सदा [illegible] कुमुदोत्पल
पंकजैः ।

सौगंधिकैश्च कल्हारैर्नवैः उत्पलैरपि हंससार
सकारंडभ्रमरैश्चक्रनामभिः । अन्यैः कलकला
रावैर्विहगैरुपशोभितम् । महासरसि तन्मध्ये
पुलिनेतिमनोहरे । परितः पारिजाताद्यं महा
कल्पतरुं स्मरेत् । नीपोपवनमध्यस्थं नानापुष्प
सुपुष्पितम् । नानारत्नफलाकीर्णं शाखाभिर्व्या
प्तजगत्त्रयम् । उद्भूतरत्नछायाभिरुल्लीढगनम्
ततम् । उद्यद्दिनकरेन्दुभ्यामुद्भासितदिगंतरम्
ऋतुभिः सेवितं षड्भिरनिशं प्रीतिवर्धनम् ।
परामृताख्यमधुभिः सिंचंतमेडपमुडुः । तस्या
धस्तान्महादेवि माणिक्यैकविनिर्मिता । वज्र
प्राकारसन्दीप्रा शतयोजनविस्तृता । तन्मध्ये
चिंतयेद्दीप्रं मण्डपं माणिक्यकुट्टिमम् । उद्यदादि
त्यसंकाशं नानास्वरत्नशिखाशीततलम् । चतुर्द्वार
समायुक्तं हेमप्राकारशोभितम् । रत्नोपला
त्रसंघूर्णाभिः कपाटाष्टकशोभितम् । नवरत्न
समाक्रान्तं तुंगगोपुरमोरुलम् । हेमदंडस
मालंबिस्तंभराजिविडंबितम् । सहस्रदी
पसंयुक्तं दीपमंडलराजितम् । तत्प्रासादक

संन्द्रोत्र वातायनमनोहरम्, नानावर्णंशुक
बद्धसुवर्णघूनकोटिभिः, किंकिणीमालि
कायुक्तपताकाभिरलंकृतम्, हेमकुंभाव
लीरम्यनानाचित्रविचित्रितम्, जातरूपमये
रत्नसूचित्रैरभिविस्तृतैः, माणिक्यरत्नवैडूर्य
स्वर्णमालावल्लीयुतैः, अंतरांतरसंबद्धरत्नै
र्हाहिमनोहरैः, विचित्रैश्चित्रवर्णैश्च वितानैरु
पशोभितम्, सर्वरत्नसमुयुक्तैर्हेमकुट्टिमयुत
मम्, कीतकीमालतीजातीचंपकनागकेस
रैः, मल्लिकातुलसीयूथीनंद्यावर्तकदंबकैः
एतैरन्यैश्च कुसुमैरलंकृतमहीतलम्, रत्नसो
पानसंबद्धभूमिकाभिरुपस्कृतम्, चंद्रकपूर्
रकस्तूरीमृगनाभिमालकैः, चंदनागुरु
कादर्बैरधिपितदिगंतरम्, रत्नसिंहासनं दं
श्रीमत्श्रीयंत्रमंडितम्, इंद्रादिदेवतावृंदैः
लाविष्णुशिवादिभिः, अनेकयोगिनीवृंदैरत्र
दैवतकैरपि, संसेव्यमानपादाब्जयुग्मयान
तत्रतत्पश्या।

महात्रिपुरसुंदर्यो धिष्ठितं सर्वकामदत्र सुधास
न्दोहकं होनं लोनितं मोक्षकामदत्र नमि
नुश्यानपीठेश्रीलोपामुद्रांस्मरेत्परामू ॥
बालार्कोद्युतभास्वरां त्रिनयनां मंदस्मितां
यन्मुखीं राजमृद्रकलाधरां सुकवरीं सुस्म
लिंदुं दाकुलामू। कस्तूरीतिलकांवनस्तनभ
रां पाशांकुशा वेक्षवं कोदंडं कुसुमेषुमेव
दधतीं श्रीहादि विद्यां स्मरेत् ॥ इति ध्यानं मे दे
नध्यात्वा मूलपं महात्रिपुरविद्यायै विद्महे
पंचदशाक्षर्यै धीमहि। तन्नो लोपामुद्रा प्र
चोदयात्। ३॥ मूलं यथाशक्ति जप्त्वा जपं
ते मालां शिरसि निधाय पुनरपि प्राणा
यामं ऋष्यादि करषडंगन्यासान्निधाय।
ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं
जपम् सिद्धिर्भवतु मे देवि त्वत्प्रसादान्म
हेश्वरि २ निमंत्रेण महायोनिमुद्रया
२॥ प्रणमेदिति श्रीजपविधिः॥ श्रीः॥
2